**विषयक्षेत्रम् – अनिवार्यसंस्कृतम्**

**पाठ्यांशनाम** — संस्कृतवाङ्मयपचियः **पाठ्यांशसंकेतः** –

**स्तरः**– शास्त्री **पूर्णाङ्का :** –१००

**बर्षः**– द्वितीयः **वार्षिकः पाठ्यभार** :–१६० पा.घ.

**पत्रम्** – प्रथमम् **साप्ताहिकः पाठ्यभार** : –६

## १. पाठ्यांशपरिचयः

पञ्चसु प्रकरणेषु विभक्तोऽयं पाठ्यांशः। उत्तरमध्यमस्तरपरीक्षां तत्समकक्षान्यपरीक्षां वा समुत्तीर्य शास्त्रिस्तरे ऽध्येतुकामानां छात्राणां संस्कृतवाङ्मयस्य वैशिष्ट्यविश्लेषणाय प्रवेशद्वारभूतोऽयं पाठ्याशोऽस्ति निर्धारितः। स्तरीयसंस्कृतभाषाया विशेषेण प्रयोगनैपुण्याभिवृद्धये पाठ्यांशोऽयं परमोपयोगी । गहनतमसंस्कृतकाव्यानामध्ययनमत्र **क**प्रकरणे विधीयते । तदर्थं बाणभट्टप्रणीतायाः कादम्बर्याः कथामुखमत्र निर्धारितं विद्यते। प्रतिपदं विग्रहसमासालङ्कारादिकमत्र पाठ्यते। प्रकणस्य प्रारम्भे संस्कृतगद्यकाव्यस्य परम्परायां वाणभट्टस्य प्रवृत्तिगतं वैशिष्ट्यञ्चात्र प्रकाश्यते । **ख**प्रकरणे महाकवेः कालिदासस्यावदानेन तदीयप्रवृत्तिगतवैशिष्ट्येन च सहैव समासविग्रहपर्यायकोषादिप्रदर्शनपुरःसरं व्याख्यानाय रघुवशंमहाकशाव्यस्य तृतीयसर्गो निर्धारितः । **ग** प्रकरणे च नाटकलक्षणज्ञानपुरःसरं नाटककारभवभूतेरावदानस्य विषयः, तदीयं उत्तररामचरितं नाम नाटकञ्च निर्धारितम् । **घ** प्रकरणे संस्कृतवाङ्मयपरिचयप्रदा पृथग् विषयसम्बद्धाः केचन निबन्धाः समाविष्टाः सन्ति। तेषामध्ययनेनच्छात्रा संस्कृतवाङ्मयस्य विविधविधासु प्रतिपादितानां विषयाणां प्रमुखसिद्धान्तानां व्याख्याने च शक्ता भविष्यन्तीति प्रतीयते। **ङ** प्रकरणे सुललितसंस्कृतरचनासम्बद्धा विषयाः समाविष्टाः सन्ति। च प्रकरणे च व्यावहारिकजीवनसम्बद्धा सदाचार–पञ्चाङ्गाशौचपरिचयप्रदा विषयाः सन्ति निर्धारिताः ॥

## २. पाठ्यांशस्य सामान्योश्यानि

अस्य पाठ्यांशस्याध्ययनेन छात्रा अधोलिखितविषयषु प्रावीण्यमेष्यन्ति–

- बाणभट्टविरचितगद्यकाव्यस्य वैशिष्ट्यप्रदर्शने
- समस्तपदानां श्लिष्टपदानाञ्च विग्रहप्रदर्शनमुखेन निर्धारितगद्यभागस्य व्याख्याने
- महाकवेः कालिदासस्य सपचियं काव्यगतवैशिष्ट्यप्रदर्शने।
- निर्धारितमहाकाव्यान्तर्गततृतीयसर्गस्थपद्यानां प्रसङ्गविग्रहपर्यायकोशभावार्थप्रदर्शन पुरःस्सरं व्याख्याने।
- भवभूतिरचितस्य उत्तररमचरितनाटकस्य परिचयप्रदाने , प्रथमाङ्कपद्यानां व्यख्याने, भावार्थप्रकाशने च।
- संस्कृतवाङ्मयप्रतिनिधिभूतानां प्रमुखाणां विषयाणां सिद्धान्तानाञ्च विश्लेषणे
- सुललितसंस्कृतरचनाकौशलवर्धने।
- व्यावहारिकजीवनसम्बद्धानां सदाचारपञ्चाङ्गाशौचपरिचयप्रदानां विषयाणां निरूपणे च।

## ३. पाठ्यांशस्य विशिष्टेद्देश्यानि, पाठ्यविषयसंयोजनञ्च

| प्रकरणानि | प्रकरणगतविशिष्टेद्देश्यानि | पाठ्यविषयाः | अङ्काः | पाठ |
|---|---|---|---|---|
| क | वाणभट्टस्य प्रवृत्तिगतवैशिष्ट्यस्य प्रकाशनम्<br>संस्कृतप्रौढगद्यभागस्य विग्रहपर्यायकोशप्रदर्शनमुखेन व्याख्यानञ्च। | आदितः शुककृतशूद्रक नरपतिप्रशंसान्तो भागः। | २० | ३० |
| ख | निर्धारितमहाकाव्यस्य कृतिगतवैशिष्ट्य प्रदर्शनपुरःसरं प्रतिपदं समासविग्रह–भावार्थपर्यायालङ्कारादिकं प्रदर्श्य व्याख्यानम् | रघुवंशमहाकाव्यस्य तृतीयसर्गस्थानि निर्धारितानि आदिदतःपञ्चत्रिंशत्पद्यानि। | १० | १५ |
| ग | भवभूतिरचितोत्तररामचरितस्य कृतिगतवैशिष्ट्यप्रदर्शनपूरःसरं निर्धारितपद्यानां प्रतिपदं समासविग्रह–भावार्थपर्यायालङ्कारादिकं प्रदर्श्य व्याख्यानम्। | भवभूतिप्रणीतोत्तररामचरितसम्बद्धा निर्धारिता विषयाः | १० | १५ |
| | संस्कृतवाङ्मयस्य विविधविधासु प्रतिपादितानां विषयाणां प्रमुखसिद्धान्तानां व्याख्यानम् | संस्कृतवाङ्मयस्य विविधविधासु प्रतिपादितानां विषयाणां सिद्धान्तानाञ्च निरूपकाः केचन निर्धारिता निबन्धाः | ३० | ५० |
| ङ | कानिचिदाधारभूतानि वाक्यानि प्रकल्प्य कारकनियमानुसारेण तेषां विस्तारकलाप्रदर्शनम्<br>अनुवादकलानिदर्शनम्<br>निबन्धलघुकथासंवादसङ्कथन लेखनकलाप्रकाशनम्।<br>समासनियमानुसारेण समस्तपदानां विग्रहप्रदर्शनम्। | संस्कृतगद्यखण्डस्य नेपालीभाषायां नेपालीभाषायां रचितस्य गद्यखण्डस्य च संस्कृतभाषायामनुवादः, निबन्धरचना, लघुकथाः, स्वल्पसंवादाः, सङ्कथनानि, कस्यापि अनुच्छ्दस्य संक्षेपीकरणम्,कस्यापि सूक्तेर्विस्तृतीकरणञ्च। | २० | |
| च | व्यावहारिकजीवनसम्बद्धानां सदाचारपञ्चाङ्गाशौचपरिचयप्रदानां विषयाणां निरूपणञ्च | सदाचारपञ्चाङ्गाशौचपरिचयप्रदा निर्धारिता विषयाः | १० | १५ |

**४. पाठ्यवस्तुविवरणम्**

**क प्रकरणे** गद्यकाव्यस्य लक्षणम्: बाणभट्टस्य परिचयः,बाणभट्टस्य प्रवृत्तिगतं वैशिष्ट्यम् । कादम्बर्या : कथावस्तु । मङ्गलाचरणम्, शूद्रकवर्णनम्,तस्य राजधान्या विदिशाया वर्णनम्, राजानं द्रष्टुं समागताया मातलिकन्यकाया वर्णनम्, नरपतेराज्ञया शुकमादाय प्रवेशितया च तया आस्थानमण्डपे निषण्णस्य तया विलोकितस्य राज्ञो वर्णनम्, राज्ञा विलोकिताया पुरुषधिष्ठितपुरोभागाया मातङ्गकुमार्या वर्णनम्, पुरुषेण समर्पिते च शुके तन्मुखेन शुकस्य वैशिष्ट्यवर्णनम्, ततश्च आर्याछन्दसा राज्ञः प्रशंसनम्, कादम्बर्या आदितः शूककृतशूद्रकप्रशंसनपर्यन्तगद्यभागस्य विग्रहपर्यायालङ्कारादिप्रदर्शनपुरःसरं व्याख्यानञ्च।

**ख प्रकरणे**

कालिदासस्य परिचयः, तदीयकृतिगतं वैशिष्ट्यम्। रघुवंशमहाकाव्यस्य तृतीयसर्गस्थानि आदितः त्रिंशत्पद्यानि

**ग प्रकरणे**

नाटकस्य लक्षणम्, तदवयवाश्च। नाटककारस्य भवभूतेः परिचयः, तदीयकृतिगतं वैशिष्ट्यञ्च, व्याख्यायाः कृते उक्तनाटकस्य प्रथमाङ्कस्थानि पद्यानि।

**घ प्रकरणे संस्कृतवाङ्मयपरिचयः**

(क) संस्कृतवाङ्मयस्य विविधविधासु प्रतिपादितानां विषयाणां प्रमुखसिद्धान्तानां व्याख्यानाय सहाय्यभूता प्रबन्धरत्नाकरादुद्धृता अधोऽङ्किता निबन्धाः–

१.वेदानां महत्त्वम् २. वेदाङ्गानि ३. उपनिषज्ज्योतिः ४. धर्मसूत्राणां वेदमूलकत्वम्, धर्मस्य च महनीयत्वम्, ५. पुराणनां महत्त्वम्, ५.वेदान्तदर्शनम् ७. साङ्ख्यदर्शनम्, ८ नास्ति योगसमं बलम् ९. वैशेषिकदर्शनम् १०. न्यायदर्शनम् ११. मीमांसा १२. बौद्धदर्शनम् १३. जैनदर्शनम् १४.चार्वाकदर्शनम् १७ .श्रीमद्रामायणी गङ्गा पुनाति भुवनत्रयम् १८ .महाभारतम् १९. ज्योतिश्शास्त्रस्य लोकोपकारित्वं महत्त्वञ्च २० शब्दानुशासनम् २१. साहित्यशास्त्रम्, २२ संस्कृतभाषा।

(ख) संस्कृतवाङ्मयस्य विविधविधासु प्रतिपादितानां विषयाणां प्रमुखसिद्धान्तानां व्याख्यानाय सहाय्यभूता संस्कृतवाङ्मये विज्ञानमित्यस्मात् संग्रहग्रन्थादुधृद्ता अधोऽङ्किता निबन्धाः–

१.शुल्वविद्यारम्भः २. संस्कृतवाङ्मये विमानविज्ञानम् ४.वास्तुविज्ञानम् ५. संस्कृते सङ्गणकव्रस्यि आवश्यकता, तत्प्रयोगश्च ६..आयुर्वेदे वनस्पतिविज्ञानम् ७..अर्वाचीनसंस्कृतसाहित्ये विमानकाव्यम् ।

**ङ प्रकरणे**

१.नेपालीभाषातः संस्कृतभाषायां संस्कृभाषातः नेपालीभाषायामनुवादः, आधारभूतानि कानिचिद् वाक्यानि प्रकल्प्य कारकनियमानुसारेण तेषां विस्तरणेù भ्यासः, कस्याप्यनुच्छेदस्य संक्षेपीकरणेù भ्यासः, अधोलिखितसूक्तीरवलम्ब्य भावार्थप्रकाशने वाक्येषु प्रयोगे चाभ्यासः– १.हितं मनोहारि च दुर्लभं वचः, २.यशः पूण्यैरवाप्यते,३. कीर्तिर्यस्य स जीवति,४. अजीर्णे भोजनं विषम्, ५. अति सर्वत्र वर्जयेत्,६.आलस्योपहता विद्या, ७.काले दत्तं वरं स्वल्पमकाले बहुनापि किम्, ८.कुवाक्यान्तञ्च सौहृदम् ९. निर्धनस्य कुतः सुखम् १०. परोपकाराय सतां विभूतयः ११.माता समं नास्ति शरीरपोषणम्, १२. विद्वान् सर्वत्र पूज्यते १३.विनाशकाले विपरीतबुद्धिः १४.बुद्धिर्यस्य बलं तस्य १५शीलं हि सर्वस्य नरस्य भूषणम् ।

२.समासपरिचयः, समासभेदाः, अव्ययीभाव– तत्पुरुष– कर्मधारय बहुव्रीहि–द्विगु –समाहारेतरेतरद्वन्द्वानां सोदाहरणमभ्यासः।

**च प्रकरणे**

१. **आचाराः**–याज्ञवल्क्यप्रतिपादिता अधोलिखिता विषयाः– याज्ञवल्क्यपरिचयः, विद्यानां धर्मस्य च स्थानानि, धर्मशास्त्रप्रयाजकाः, धर्मलक्षणम्,वर्णानां संस्कारकालाः, शौचाचाराः,उपनयनस्य परमकालावधिः, वर्णत्रयस्य द्विजत्वनिरूपणम्, वेदाध्ययनफलम्, स्नानम्, स्नानानन्तरकर्तव्यम्, विवाहाय प्रशस्ता कन्या, प्रशस्तो वरः, विवाहप्रकारास्तेषां लक्षणानि च। गृहस्थधर्माः, श्राद्धपरिचयः, गृहस्थधर्माः।

**२. आशौचनिर्णयः–** सपिण्डसमानोदकसकूल्यपरिचयः,जननाशौचानि, मरणाशौचानि, आशौचसम्पातः अतिक्रान्ताशौचानि।

**३.पञ्चाङ्गपरिचयः–** पञ्चाङ्लक्षणम्, नेपाले पञ्चाङ्गनिर्माणस्य तत्प्रकाशनस्य च विकाशक्रमः, प ञ्चाङ्गालोकनविधिः, पञ्चाङ्गे वर्णिताः प्रमुखविषयाः, तेषा परिचयश्च। संवत्सरस्य परिचयः, षष्टिः संवत्सराः, अयने, सौरचान्द्रमासपरिचयः,षड् ऋतवः, पक्षौ, तिथयः, नक्षत्राणि, केषाञ्चन नक्षत्राणां चित्रनिर्माणम् (कृत्तिकाः, मृगशीर्षम्, मघाः, हस्तः, अनुराधाः, ज्येष्ठा, मूलम्), द्वादशराशिपरिचयः, कषाञ्चन राशीनां चित्रनिर्माणम् (सिंहः, वृश्चिकः, धनुः),योगपरिचयः, करणपरिचयः, वारपरिचयः, नवग्रहाणां परिचयः अधिकमासाः (२०६६–२०९५ वै.) यात्राविचारः, चन्द्रवासविचारः, योगिनीविचारः, पञ्चकज्ञानम्, अग्निवासविचारः, शिववासविचारः, वारवेलाचक्रम्, विवाहे मेलापकम्, गुणज्ञानम्, नक्षत्रपादाक्षरज्ञानम्, नक्षत्रपादाक्षरानुसारिनामकरणम् ग्रहणपरिचयः, ग्रहणे कर्तव्याकर्तव्यविचारः देशान्तरानुसारेण सूर्योदयतदस्तकालयोर्घटिकानयनज्ञानम्,लग्नपत्रिकालेखनम्, व्रतपत्रिकालेखनञ्च, विवाहव्रतबन्धादिषु रविचन्द्रगुरुशुद्धि–प्रदर्शनम्।

**५.शिक्षणविधयः शैक्षिकसामग्री च**

निगमनागमनप्रश्नोत्तरप्रवचनविमर्शप्रदर्शनात्मकशिक्षणाद्याः शिक्षणविधय एवात्र प्रयुज्यन्ते । सति सम्भवे शिक्षकैस्तदिरा अन्वेषणपरियोजनयो प्राक्कल्पनादयश्छात्रकेन्द्रिता अन्ये विधयोऽपि प्रयोक्तुं शक्यन्ते । यथासम्भवं शिक्षकैः केवलं मार्गं निर्दिश्य स्वयमेव निर्धासितनिबन्धादीनां पाठाय छात्राः प्रेरणीयाः । विषयानुसारेण समुचितानां विविधानां श्रव्यदृश्यशैक्षिकसामग्रीणां प्रयोगो विधेयः । तद्व्यवस्था सम्बद्धशिक्षकेण विभागेन विद्यापीठेन वा विधेया । साम्प्रतं दूरशिक्षणमपि प्रचलितं विद्यते । तदर्थं सङ्गणकयन्त्राणि प्रयुज्यन्ते । शिक्षकप्रशिक्षणव्यवस्थापि तत्रापेक्षते । तदर्थं विश्वविद्यालयेन विद्यापीठेन वा सक्रियता अवलम्बनीया।

**६.मूल्याङ्कनविधिः**

मूल्याङ्कनं द्विधा विभक्तमस्ति – **आन्तरिकं** (निर्माणात्मकम्) **बाह्यम्** (निर्णयात्मकम्) **च**। आन्तरिकमूल्याङ्कनं प्रायेण कक्षागतं भवति । कक्षायां पठनपाठनोपस्थ्यादिकं विलोक्य सम्बद्धशिक्षकेण विभागसमन्वितकार्ययोजनायां आन्तरिकमूल्याङ्कनं विधीयते । गृहकार्यं कक्षा परीक्षा, परियोजनाकार्यम् इत्यादीनि अन्यानि साधनान्यपि तन्मूल्याङ्कनस्याधारा भवितुं शक्नुवन्ति । आन्तरिकमूल्याङ्कनस्य कृते पञ्चविंशतिप्रतिशदङ्का निर्धारिताः । बाह्यमूल्याङ्कनस्य तु वर्षान्ते बाह्यपरीक्षा भवति। प्रश्नपत्रे बाह्यपरीक्षायाः पूर्णाङ्काः शतमेव भवन्ति, परन्तु नियमितच्छात्राणां कृते परीक्षाफलप्रकाशनात्पूर्वं सम्बद्धविद्यापीठेन प्रेषितानामान्तरिकमूल्याङ्कनस्याङ्कानां नें सं.वि. परीक्षानियन्त्रणकार्यालयेन अनुपातपद्धत्या संयोजनं विधास्यते । बाह्यपरीक्षायां मूल्याङ्कनाय अङ्कवितरणेन सहैव अधोनिर्दिष्टा प्रश्नप्रकाराः

निर्धारिताः सन्ति। साधारणतया बाह्यपरीक्षा लेखात्मिकैव भवति, परन्तु परिस्थितिवशात् सा परीक्षा अन्तर्वार्तादिनापि सिद्ध्यति ।

**वार्षिक–परीक्षा–प्रश्नपत्रसारिणी**

| **प्रकरणानि क,ख,ग,घ,ङ** | **प्रश्नप्रकाराः** | **प्रश्नसंख्याः** | | **अङ्काः** |
|---|---|---|---|---|
| | | **प्रष्टव्याः** | **समाधेयाः** | |
| | विवेचनात्मकाः | ३ | २ | २४ |
| | संक्षिप्तोत्तरापेक्षिणः | ९ | ६ | ४२ |
| | व्याख्यात्मकाः | ४ | ३ | २४ |
| | वस्तुगताः | १० | १० | १० |
| | | २७ | २१ | १०० |

**पाठ्यग्रन्थाः** (पाठ्यांशत्रमेण)

(१) बाणभट्टः**, कादम्बरी** () चौखम्बाप्रकान, वाराणसी, भारत

(२) कालिदासः **रघुवंशकहाकाव्यम्** (निर्धारितांशः) चौखम्वाविद्याभवन, वाराणसी

३ भवभूतिः, **उत्तररामचरितम् ,** चौखम्बा संस्कृत सिरिज वाराणसी

३..याज्ञवल्क्यः, **याज्ञवल्क्यस्मृतिः** ( आचाराध्यायस्य निर्धारितांशः) चौखम्बा विद्याभवन वारणसी।

४. शुक्ल, रमेशः (डा) **प्रबन्धरत्नाकरः**,(निर्धारितनिबन्धाः) चौखम्बा विद्याभवन वाराणसी

५.सं. सेमबालः, श्रीकृष्णः, **संस्कृतवाङ्मये विज्ञानम्** (निर्धारितनिबन्धाः) दिल्ली संस्कृत अकादमी, दिल्ली स

सिग्द्याल, सोमनाथ, **अनुवादचन्द्रिका,** तृतीय प्रकाशः,चतुर्थप्रकाशश्च।

(ई.सन्.)

**सहायकग्रन्थाः (**वर्णक्रमानुसारेण )

१. ईश्वर कृष्णः , **साङ्ख्यकारिका,** चौखम्वाविद्याभवन वाराणसी

२ कपिलदेव द्विवेदी (डा.) **संस्कृतनिबन्धशतकम्,** (चतुर्थसंस्करणम्) विश्वविद्यालय प्रकाशन, वाराणसी।

३ काशीनाथ, **धर्मसिन्धु,** चौखम्बा संस्कृत सिरीज वाराणसी, सन् १९६८।

४ . कौण्डिन्यायन, प्रमोदः (डा.) **वैदिकतिथिपत्रम्,** , काष्ठमण्डपनगरम् : स्वाद्ध्यायशाला, २०७८

५. गौतम, रामचन्द्र, (डा.) **आशौच विवेचन,** नेपाल संस्कृत विश्वविद्यालय (दोस्रो संस्करण) २०६८

६. जगत प्रसाद उपाध्याय (अनुवादक) **नेपाली टीका** विशेषटिप्पणीसहित, तर्कामृतम् , काठमाडौं, नेपाल, २०६७ ।

७ .ढुङ्गाना, नीलमणि **व्युत्पत्तिमूलक संस्कृत– नेपाली शब्दकोश,** ललितपुर : साझाप्रकशन, २०७८

८ .नेपाल संस्कृतविश्वविद्यालय, ***नेपालदेशीयपञ्चाङ्गम्,*** *बेलझुण्डी, दाङ*

९. **पूर्णिमा** (त्रैमासिकी पत्रिका) (३४, वेदाङ्गज्योतिषाङ्कः, काठमाडौँ : संशोधनमण्डलम्, २०३३

१०. भट्टराई ,पद्मप्रसाद, **पौरस्त्य दर्शन एक चिनारी,** विद्यार्थी पुस्तक भण्डार, भोटाहिटी, काठमाडौं, नेपाल २०७४ ।

११ भट्टाचार्य , जगदीशः, **तर्कामृतम्** , चौखम्वाविद्याभवन वाराणस

१२ मिश्र, रामचन्द्रः, **संस्कृसाहित्येतिहासः** चौखम्बा विद्याभवन, वाराणसी १९९०

१३. यति सदानन्दः (इं.२००३) **वेदान्तसारः** परिमलपब्लिकेशन, दिल्ली, भारत।

१४. लौहाक्षिभास्करः **अर्थसंग्रहः**, चौखम्वाविद्याभवन वाराणसी

## विषयक्षेत्रम् — अनिवार्यसंस्कृतम्

स्तरः — शास्त्री वर्षः — द्वितीयः,

पाठ्यांशनाम — संस्कृतवाङ्मयम् पूर्णाङ्काः १००

### विशिष्टीकरणतालिका

| प्रश्नप्रकाराः | प्रकरणानि | प्रष्टव्याः प्रश्नाः | समाधेयाः प्रश्नाः | अंकाः | अङ्क वितरणम् | | |
|---|---|---|---|---|---|---|---|
| विवेचनात्मकाः प्रश्नाः | क घ | ३ | २ | १२ | २४ | | |
| व्याख्यात्मकाः | क,ख,ग | ४ | ३ | ८ | २४ | | |
| संक्षिप्तोत्तरात्मकाः | ख (१) ग (१) घ (३) ङ (१) | ९ | ६ | ७ | ४२ | अत्र निर्धारित क्षेत्रेभ्यो नव प्रश्नाः प्रष्टव्याः। तेषु षण्णामेव प्रश्नानामुत्तरदानायच्छात्रा निर्देशनीयाः। तेषामङ्कभारश्च प्रतिप्रश्नं सप्ताङ्का निर्धारणीयाः , वैकल्पिकप्रश्नाः सम्बद्धप्रकरणादेव अथवारूपेण देयाः। | |
| अतिसंक्षिप्तोत्तरात्मकाः | | १० | १० | १० | १० | एतेषां प्रश्नानाम् उत्तराणि यथातिसंक्षिप्तानि स्युस्तथा प्रश्नाः प्रष्टव्याः। | |

आदर्शप्रश्नपत्रम्

शास्त्रिपरीक्षा

विषयः अनिवार्यसंस्कृतम् खण्डः द्वितीयः पूर्णाङ्काः १०० समयः घण्टात्रयम्

½विवेचनात्मकाः प्रश्ना

१. कादम्बरीगद्यकाव्यस्य वैशिष्ट्यं प्रकाशयत। १२

२. वैदिकावैदकदर्शनयोः पार्थक्यं विवेचयत। १२

अथवा

३.साङ्ख्यदर्शनस्य नामकरणे बीजं निर्दिश्य तद्दर्शनतत्त्वानि लिखत।

व्याख्यात्मकाः प्रश्नाः

४.अधोलिखितगद्यभागस्य प्रसङ्गपर्यायविग्रहालङ्कारनिर्देशं व्याख्यायताम्। ८

आसने स्थितमपि धनुषि निषण्णम्, आयतलोचनमपि सूक्ष्मदर्शनम्, महादोषमपि सकलगुणाधिष्ठानम्, कुपतिमपि कलत्रवल्लभम्, अविरतप्रवृत्तदानमप्यमदम्, अत्यन्तशुद्धस्वभावमपि कृष्णचरितम्, अकरमपि हस्तस्थितभूवनमण्डलम् राजानमद्राक्षीत्।

५. अधस्तनपद्यस्य प्रसङ्गपर्यायविग्रहादिप्रदर्शनपुरःसरं व्याख्यायताम्। ८

स न्यस्तचि ामपि राजलक्ष्मीं तेजो विशेषानुमितां दधानः।

आसीदनाविष्कृतदानराजीरन्तर्मदावस्थ इव द्विपेन्द्रः॥

अथवा

अधस्तनपद्यं खण्डान्वयपद्धत्या व्याख्यायताम्।

कैलासगौरं वृषमारुरुक्षोः पादार्पणानुग्रहपूतपृष्ठम् ।

अवेहि मां किङ्करमष्टमूर्तेः कुम्भोदरं नाम निकुम्भतुल्यम्॥

६. भावार्थं लिखत। ८

लैकिकानां हि साधूनामर्थं वागनुवर्तते।

ऋषीणां पुनराद्यानां  वाचमर्थोऽनुधावति ॥

७. बौद्धदर्शनशाखानां परिचयः प्रस्तूयताम् ।  ७

अथवा

धर्मस्य वेदमूलकत्वे  युक्तयः प्रकाश्यन्ताम् ।

८.संस्कृतवाङ्मयानुशीलने सङ्गणकयन्त्रस्य कुत्र उपयोगो भवति ? समुल्लिख्यताम्  ७

अथवा

शुल्वविद्यायाः  परिचयो दीयताम् ।

१०. षट्कारकलक्षणोपेतैर्दशभिर्वाक्यैर्वसन्तर्तुर्वर्ण्यताम्  ॥  ७

११. अधस्तनपदानां विग्रहं प्रदर्श्य समासनामानि च लिख्यन्ताम्  ७

यथाशक्ति,  घनश्यामः, पीताम्बरम्, अपुत्रः,  किंपुरुषः, त्रिलोकी, मातापितरौ ।

१२. यशः पुण्यैरवाप्यते इत्युक्तेराशयो विस्तार्यताम् ।  ७

१३. विवाहप्रकाराणां नामानि निर्दिश्यन्ताम्

अथवा

रुद्राभिषेककर्मणि काः कास्तिथयो भवन्ति ग्राह्याः ?  उल्लिख्यन्ताम् ।  ७

अतिसंक्षिप्तोत्तरात्मकाः प्रश्नाः

१४. सर्वेषामेव प्रश्नानामुत्तराणि अतिसंक्षेपेण लिख्यन्ताम् ।  १०

(क) स्याद्वादः कस्य मतमस्ति ?

(ख) न्यायदर्शने कति प्रमाणानि सन्ति ?

(ग) ऋणं कृत्वा घृतं पिबेत् इति कस्य  मतम् ?

(घ) काव्यशास्त्रे ध्वनिसिद्धान्तः केन प्रवर्तितः ?

(ङ) उत्तररामचरिते कस्य रसस्य प्राधान्यम् ?

(च) रघुवंशमहाकाव्यस्य रचयिता कोù स्ति ?

(छ) भौमस्य कति उपग्रहाः सन्ति ?

(ज) ब्राह्मणस्य कृते उपनयनकालस्य परमावधिः कोù स्ति ?

(झ) अनुराधानक्षत्रस्य पादाक्षराणि कानि ?

(ञ) विवाहितानां स्त्रीणां पितुर्मरणे कतिदिनानि आशौचानि भवन्ति ?